दिकारणैः कपालद्वयसंयोगस्यघटइतिनामेत्यादिना
अवयवीस्वीकृतः एवंचोक्तावयवानांयथास्थानसंयोग
स्यैवशरीरमितिनामेतिवाच्यं तथैवात्रापिउक्तविकल्प
समस्तेनैवब्राह्मणइति। अनेनब्राह्मणदंपत्योः सुतः श्रु
तिविहितजातकोपनयनादिकर्मसंस्कृतः सदाचारसं
पन्नोवेदाध्यायीज्ञानवान् संपूर्णब्राह्मणोभवतीत्युत्तर
मुक्तंभवति तर्हितस्मिन्नेकस्याप्यभावेब्राह्मणत्वंन
स्यादितिचेन्न॥ यथाशरीरेहस्तपादादिविकलत्वेकुणिः
खंजः पंगुः काणः अंधइत्यादिविशेषनाममात्राधि
क्यंपरंतुनशरीरत्वहानिः एवमत्रापिकर्मजउत्वे॥

अनागतांतुयःपूर्वांसादित्यांचैवपश्चि
मां॥ उपासीतद्विजःसंध्यांनसर्वोऽब्रा
ह्मणःस्मृतइति॥

अब्राह्मणः संपूर्णब्राह्मणोनभवतीत्यर्थः। समोक्तोब्रा

ह्मणश्चवा। इत्यादिविशेषनाममात्रमेवनतुब्राह्मणत्व
हानिः किंचयथातत्रापिउत्तमांगहीनेकबंधत्वमेवन
तुशरीरत्वंतथात्रापिसावित्र्युपदेशाभावादिपतित्यसं
पादकदोषेकृतेव्रात्यः पतितइत्येवस्यात्नब्राह्मणइति
यथोक्तमाश्वलायनचरणेन। अतऊर्ध्वंपतितसावित्री
काभवंतिनैनानुपनयेन्नाध्यापयेन्नैभिर्व्यवहरेयुरिति।
एवंसमासेनसर्वविषयोत्तरस्यदत्तप्रायत्वेऽपिभवत्कृ
तपृथक्पृथङ्निराकरणस्याप्युत्तरंदीयतेश्रृणुतावत्॥
मूलं। जीवस्तावद्ब्राह्मणोनभवतीत्यादि॥ अस्योत्तरं॥
अत्रपृथग्विचार्यमाणेजीवोब्राह्मणोनभवतिशूद्रोपि
नभवति। उक्तंचाध्यात्मरामायणेरामचंद्रेण॥

नस्त्रीपुमान्नषंडोवाजीवः सर्वगतोऽ
व्ययइति॥

एवंवस्तुतः केवलस्यपुंस्त्वस्त्रीत्ववर्णत्वाद्यभावेपिसं
योगबलेनतुघटते। यथातत्रैव॥

यथाविशुद्धस्फटिकोऽलक्तकादिस
मीपगः॥ तत्तद्वर्णयुगाभातीति॥

यथापुरुषादिशरीराविष्टस्तत्तद्योग्यव्यवहारंनिर्वह
न्तज्जनितसुखदुःखादिकमनुभवति। यथागीतायां॥

कार्यकारणकर्तृत्वेहेतुः प्रकृतिरुच्यते॥

पुरुषःसुखदुःखानांभोक्तृत्वेहेतुरुच्य
तइति॥

तथाब्राह्मणादिशरीराविष्टस्तत्तद्दूर्णाश्रमविहितकर्मकु
र्वन्तस्यसांगव्यंगत्वेनतज्जनितसुकृतदुष्कृतफलंभुं
क्ते। तदर्थमुत्तमाधमशरीरधारणमप्यविरुद्धमेव॥य
थागीतायां॥

पुरुषःप्रकृतिस्थोहिभुंक्तेप्रकृतिजा
न्गुणान्॥कारणंगुणसंगोस्यसदस
द्योनिजन्मसु॥

तथाचभागवते ३स्कंधे ३० अध्याये॥

अधस्तान्नरलोकस्ययावतीर्यातना
दयः॥क्रमशःसमनुक्रम्यपुनरत्राव्र
जेच्छुचिरिति॥

नरलोकस्यनरदेहस्य अधस्तात्तिर्यक्शरीर इत्य
र्थः। तस्मात्भारतोक्तव्याधमृगहंसचक्रवाकादीनां
ब्राह्मणत्वंदेहांतरेनाश्चर्यकारकं। वेदमनुवचनवि
रोधविवरणं अग्रेभविष्यति। अनुभवकालेतत्वम
पिसिध्यति। अतोयावद्ब्राह्मणशरीरमविष्टस्तावज्जी
वोपिब्राह्मणएव अहंब्राह्मणइतिदृढप्रत्ययदर्श
नात्॥नतुसतिकुड्येचित्रमितिन्यायात्ब्राह्मणशरी

ह्मणश्चवा। इत्यादिविशेषनाममात्रमेवनतुब्राह्मणत्व
हानिः किंचयथातत्रापिउत्तमांगहीनेकबंधत्वमेवन
तुशरीरत्वंतथात्रापिसावित्र्युपदेशाभावादिपतित्यसं
पादकदोषेकृतेव्रात्यः पतितइत्येवस्यात्नब्राह्मणइति
यथोक्तमाश्वलायनचरणेन। अतऊर्ध्वंपतितसावित्री
काभवंतिनैनानुपनयेन्नाध्यापयेन्नैभिर्व्यवहरेयुरिति।
एवंसमासेनसर्वविषयोत्तरस्यदत्तप्रायत्वेऽपिभवत्कृ
तपृथक्पृथङ्निराकरणस्याप्युत्तरंदीयतेश्रृणुतावत्॥
मूलं। जीवस्तावद्ब्राह्मणोनभवतीत्यादि॥ अस्योत्तरं॥
अत्रपृथग्विचार्यमाणेजीवोब्राह्मणोनभवतिशूद्रोपि
नभवति। उक्तंचाध्यात्मरामायणेरामचंद्रेण॥

नस्त्रीपुमान्नषंडोवाजीवः सर्वगतोऽ
व्ययइति॥

एवंवस्तुतः केवलस्यपुंस्त्वस्त्रीत्ववर्णत्वाद्यभावेपिसं
योगबलेनतुघटते। यथातत्रैव॥

यथाविशुद्धस्फटिकोऽलक्तकादिस
मीपगः॥ तत्तद्वर्णयुगाभातीति॥

यथापुरुषादिशरीराविष्टस्तत्तद्योग्यव्यवहारंनिर्वह
न्तज्जनितसुखदुःखादिकमनुभवति। यथागीतायां॥

कार्यकारणकर्तृत्वेहेतुः प्रकृतिरुच्यते॥

पुरुषःसुखदुःखानांभोक्तृत्वेहेतुरुच्य
तइति॥

तथाब्राह्मणादिशरीराविष्टस्तत्तद्दूर्णाश्रमविहितकर्मकु
र्वन्तस्यसांगत्यंगत्वेनतज्जनितसुकृतदुष्कृतफलंभुं
क्ते। तदर्थमुत्तमाधमशरीरधारणमप्यविरुध्धमेव॥य
थागीतायां॥

पुरुषःप्रकृतिस्थोहिभुंक्तेप्रकृतिजा
न्गुणान्॥कारणंगुणसंगोस्यसदस
द्योनिजन्मसु॥

तथाचभागवते ३स्कंधे ३० अध्याये॥

अधस्तान्नरलोकस्ययावतीर्यातना
दयः॥क्रमशःसमनुक्रम्यपुनरत्राव्र
जेच्छुचिरिति॥

नरलोकस्यनरदेहस्य अधस्तात्तिर्यक्शरीर इत्य
र्थः। तस्मात्भारतोक्तव्याधमृगहंसचक्रवाकादीनां
ब्राह्मणत्वंदेहांतरेनाश्चर्यकारकं। वेदमनुवचनवि
रोधविवरणं अग्रेभविष्यति। अनुभवकालेतत्वम
पिसिध्यति। अतोयावद्ब्राह्मणशरीरमविष्टस्तावज्जी
वोपिब्राह्मणएव अहंब्राह्मणइतिदृढप्रत्ययदर्श
नात्॥नतुसतिकुड्येचित्रमितिन्यायात्ब्राह्मणशरी

रस्यसत्वेनराविष्टजीवोपिब्राह्मणोभवेत् तदेवनास्ति कुतः। अन्नमयादन्नमयमितिपांचभौतिकसाम्यात्। यद्युच्यतेअवयवानामप्यवयव्यवच्छेदकावच्छिन्नत्वात् अंगुलमात्रेऽपिशरीरत्ववदस्त्येवशरीरेब्राह्मणत्वमिति। तर्हिपावकोपिब्राह्मणहास्यात्ब्रह्महत्याचबंधूनांशरीरदहनाद्भवेदितिचेन्न। शरीरदहनस्यांत्येष्ट्यादिविधिप्राप्तत्वात्। अदहनेऽपिनाशस्यावश्यंभावित्वात्। अन्यथानाशेतुपूतिगंधकृमिपतनादिबीभत्सत्वापत्तेः तन्निवारणोपकारकत्वात्ज्वलनतापजनितपीडाभोक्तृजीवस्याप्यभावान्नतत्कर्मदोषायनभवति। नचजीवाभावादेवब्राह्मणत्वंनास्तीतिवाच्यं। अंत्येष्ट्यादिश्रुत्युक्तकर्माभावापत्तेः। अतएवपूर्वोक्तंकस्यचिदवयवस्यविकलत्वेविशेषनाममात्राधिक्यमिति। अतोत्रापिजीवाभावान्मृतब्राह्मणशरीरमिति॥ यदुक्तंब्राह्मणशरीरविनाशाच्चयजनादिषट्कर्मणांब्राह्मणशरीरजनितानांफलस्यनाशःस्यादिति। एतच्चभवन्मतं। यथा॥

भस्मीभूतस्यदेहस्यपुनरागमनंकुतः॥
तस्मात्सर्वप्रयत्नेनऋणंकृत्वाघृतंपिबेदिति॥

नचैतदभिमतं लोकांतरेतत्फलानुभवस्यशास्त्रसिद्धत्वात्। यथाहभगवान्।

त्रैविद्यामांसोमपाःपूतपापायज्ञैरिष्ट्वास्वर्गतिंप्रार्थयंते॥तेपुण्यमासाद्यसुरेंद्रलोकमश्नंतिदिव्यान्दिविदेवभोगानिति॥

अन्यच्च। यदिशरीरंब्राह्मणःस्यात्तर्हिब्राह्मणशरीरनिष्पंदजाताश्चक्षत्रियवैश्यशूद्राअपिब्राह्मणाःस्युरिति॥अत्रब्राह्मणदंपत्योःसुतस्यैवब्राह्मणजातेर्गृहीतत्वात्तेब्राह्मणाभवितुंनार्हंति। अनेनैवविदुराइतिलोकेप्रसिद्धाब्राह्मणजनितादासीपुत्रास्तेषामपिनिवृत्तिः॥इतिशरीरमपिब्राह्मणोनभवतीत्यस्योत्तरं॥एवंचेत्तर्हिब्राह्मणाभावःप्राप्नोति। इदानींतनेषुब्राह्मणेषुपितरिसंदेहादितिचेत्। भवान्प्राज्ञःअतोत्रभवतएवपितरिसंदेहोनान्येषां। एवंसुधासर्वत्रसंदिहानस्यसुखोदर्कनस्यात्। यथा।

अज्ञश्चाश्रद्दधानश्चसंशयात्माविनश्यति॥नायंलोकोस्तिनपरोनसुखंसंशयात्मनइति॥

अहोगोत्रब्राह्मणमारभ्यब्राह्मणीनांशूद्रपर्यंतमभि

गमनदर्शनात्संशयाभावएवेतिचेत्भवान्भल्लाक्षःपु
रोभागीतिभवानेवैतत्सदापश्यतिनान्ये। किंच। एतादृ
शकर्मणःकुत्राप्यभावएवेतिनास्माभिरुच्यते। यत्रसा
क्षात्पश्यंतितत्रसद्यएवबहिष्कुर्वंतितत्रापि। रजसा
शुध्यतेनारीतिवचनात्गर्भधारणात्प्रगेवोत्तमाधम
तारतम्येननिवृत्तेरवसरःपरंतस्तुनास्त्येवपुनरावृत्तिः
सगोत्रब्राह्मणाद्गर्भधारणेऽपितत्रजातस्यकुंडत्वंन
तुब्राह्मणत्वं। अमृतेजारजःकुंड इतिकोशोक्तेः। तदा
अन्यत्किंवाच्यं। अथवृथाकथमुच्यतेब्राह्मणाभावः
प्राप्नोतीति॥ भवादृशदुष्टप्रवादस्यत्वासवाक्यत्वाभावात्ते
नव्यवहारनिश्चयोभवितुंनार्हति। कुतः॥

अपक्वयाचामधमाधमानांनसूक्तिगं
धोपिगिरांप्रबंधे॥ पिण्याकपण्यव्यव
हारभूमोकुरंगनाभेःकुतएववार्ता॥

इत्यस्मात्॥ नन्वयदासाक्षात्प्रपश्यंतितदाबहिष्कुर्वंतु
परंतुतत्पूर्वदोषस्यब्राह्मणत्वएवविद्यमानत्वात्कथं
ब्राह्मणत्वस्यशुध्यत्वमितिचेत्मैवंवोचः। एतद्दोष
स्याज्ञातस्थितिःपरंतुभवच्छरीरउदरकोष्टकेमलो
स्तीतिभवताज्ञातमेवतथाऽपिशरीरंनत्यजसिनवा
अपवित्रंमन्यसेतस्मिन्नेवबहिःपतितेत्वतीवासह्यं

मन्यसेदूरतएवत्यजसिनैवमेवनत्वापीतिजानीहि।

सर्वारंभाहिदोषेणधूमेनाग्निरिवावृता

इत्युक्तेः॥

ननुब्राह्मणदंपत्योःसुतस्यैवब्राह्मणजातेर्गृहीतत्वा दित्युक्तमेतदनुपपन्नंव्यभिचारदर्शनात्। उक्तंहि स्मृतौ। हस्तिन्यामचलोजातइत्यारभ्यजातिस्तावद्ब्रा ह्मणोनभवतीत्यंतस्योत्तरं॥ कपिलोदेवहूत्यांजात इतिपुराणेअत्रकपिलाजातइतिलिखितं। अगस्त्यः कुंभसंभवइतिकोशेअत्रागस्तिपुष्पादिति। विश्वामि त्रोगाधिराजसुतइतिपुराणेअत्रचंडालीसुतइति। किंच। एकत्रकौशिकःकुशसंभवइतिपुनःकौशिकं त्वेवशूद्रिकेतिच। कौशिकस्तुविश्वामित्रएव। महेंद्र गुग्गुलूलूकव्यालग्राहिषुकौशिकइतिनानार्थकोशे वर्त्ततेपरंतुब्राह्मणेष्वेतेषांप्रयोजनाभावएव। अ तएवंविनिगमनाविरहात्कृतमंमत्स्यंज्ञेयं। रेणुकाः जनयद्रामामित्यत्रोक्तंरेणुकातुजमदग्नेर्भार्यैवात्रकि माश्चर्यमापतितं। कैवर्त्तिन्यजनव्यासमितिसत्यव त्यादाशराजपालितत्वात्कैवर्त्तिनीतिनामनिष्पन्नं कैवर्त्तेदाशधीवरावितिकोशोक्तेः। वस्तुतस्तुवसुरा जामोघवीर्यान्मत्स्युदरेजातासतोमत्स्यगंधेत्यपि

नाम सेवसत्यवत्यपि। अतएषाकावास्मृतिरित्येतन्मू
लंमृग्यं। अस्तुनाम स्मृतिमूलविचारः व्यासवसिष्ठद्रोणा
चार्यादयोज्ञाताः प्रसिध्धाएव अत्रैकस्याप्युक्त्यनुसारे
णवास्तवखेव्यभिचारोदुर्वारएवेत्यतउच्यते॥ तेषां
तेजोविशेषेणप्रत्यवायोनविद्यते। अतएवऋषीणांकु
लंनदीनांमूलंनविचारयेदितिलोकिकीगाथाऽपिप्रसि
ध्धा। तथाच व्यासजन्ममहाभारते आदिपर्वणि वंशा
वतरणेविस्तरतो द्रष्टव्यं। अत्रकिंचिल्लिख्यते॥

इतिसत्यवतीदृष्टालब्धावरमनुत्तमं॥
पराशरेणसंयुक्तासद्योगर्भंसुषावसा॥
जज्ञेचयमुनाद्वीपेपाराशर्यःसवीर्यवा
न्॥समातरमनुज्ञाप्यतपस्येवमनोद
धे॥स्मृतोऽहंदर्शयिष्यामिकृत्येष्विति
चसोब्रवीत्॥एवंद्वैपायनोजज्ञेसत्यव
त्यांपराशरादित्यादि॥

सांप्रतमप्येवंविधोजन्यजनकोस्तश्चेयोग्योभवतः॥
येषाममोघवीर्यंअचेतनकुशघटादावपिननश्यति।
अतएव।

महात्मनांवचःसत्यंतथैवाचरितंक्वचि
त्॥तेषांयत्स्यवचोयुक्तंबुध्धिमांस्त

त्समाचरेदिति।

आधुनिकानांवीर्यंतुक्षेत्रेऽपिनियतंनफलत्यल्पवीर्यत्वात्। अतएवब्राह्मणदंपत्योःसुतइतिनियमःकृतः। पूर्वंसामर्थ्यातिशयादेवद्वादशविधपुत्रग्रहणमासीत्। तदानींक्षेत्रजापविद्धादीनांब्राह्मणवीर्यजनितत्वज्ञानमासीत्तेनवर्णसंकरोनाभवत्। संप्रतिभवेदितिभीत्यैवौरसकृत्रिमावेवगृह्येतो। अतऋषीणांजन्मप्रदर्शनेनास्यनियमस्यबाधोनभवेत्। कुतः। यथासामान्यतःशास्त्रेचिरंदीनांसर्वत्रकेशकृंतननिषेधेऽपिप्रयागेक्षेत्रबलात्विशेषशास्त्रेणविधिर्वर्तते सतुतस्मिन्नेवक्षेत्रेयुक्तःतमन्यत्रप्रवर्तयितुंकोपिनशक्नोति। अनेनसर्वत्रनिषेधशास्त्रस्यबाधोपिनास्ति। यथाचपुरुषोत्तमक्षेत्रेनामजगन्नाथक्षेत्रेशूद्रस्पृष्टस्यापिप्रसादान्नस्यभक्षणविधिर्वर्त्तते। एवमेवसर्वत्रकर्त्तुनशक्यतेविशेषविधानाभावात्दोषश्रवणाच्च॥ यथा॥

शूद्रीहस्तेनयोभुंक्तेमासमेकंनिरंतरं॥ जीवमानोभवेच्छूद्रोमृतःश्वानश्वजायते॥

इतिमनुवचनेविद्यमानेऽपिभगवदाज्ञयातत्रविधि

रस्ति। फलश्रवणमपि। यथा।

निवेदितस्यान्नरमासखायनीचाहृत
स्यापिकिलोदनादेः॥ भुक्तान्नानंहृत
भवार्जितानांमहाहसांनाशन माम
नंतीति॥

तथैवात्रापीति ध्येयं॥ अहोमाभूदनेनहेतुनाऽति
व्याप्तिव्यभिचारः परंतु अव्याप्तिव्यभिचारस्तुदृश
ते। कथमितिचेत्। ब्राह्मणदंपतिसुतेऽपिप्रथमंब्रा
ह्मणत्वंनास्तिजन्मतः शूद्रत्वात्॥ यथाहुः॥

जन्मनाजायतेशूद्रोव्रतबंधाद्द्विजो
भवेत्॥ वेदाभ्यासीभवेद्विप्रो ब्रह्मज्ञो
ब्राह्मणोभवेत्॥

इतियच्चनादितिचेदुच्यते। अत्रेदंवचनंज्ञानवद्ब्रा
ह्मणस्यावकंनतुशूद्रत्वप्रापकंकौमारेकर्मकरणश
क्तिर्नास्तीतितन्निषेधात्ब्राह्मणत्वव्यंजककर्मकर
णाभावेनशूद्रकल्पइत्येवाशयोनतुसामान्यतःशूद्र
इतिअतोऽव्यंजितब्राह्मणत्वव्याप्यशूद्रत्वं। यथा
पितृधनेसुताणांजन्मतएवस्वत्वोत्पत्तावपिसति
पितरिविभागात्प्राक् यथेच्छव्ययेस्वातंत्र्याभावात्
अव्यंजितमेवस्वत्वंतथाऽत्रापिसंस्कारावधीतिज्ञे

यं। अन्यथाशूद्राविशेषेव्रतबंधाद्द्विजोभवेदित्युक्ते· शूद्रोपिव्रतबंधात्द्विजोभवेत्एतत्कदाऽपिनघटते। अस्तुनामशूद्रत्वेविशेषः व्रतबंधसाम्यात्क्षत्रियवैश्यसाम्यंतु घटेतेतिचेन्न। तत्रापिब्राह्मणत्वव्याप्यद्विजत्वमेवान्यथाव्रतबंधविधेरविशेषः स्यात्तथा नास्तिब्राह्मणक्षत्रियवैश्यानांक्रमात्पलाशपिप्पलौदुंबरदंडधारणंभवत्पूर्वभवन्मध्यभवदंत्याभिर्भिक्षाचाऽस्याअभिवादनेशर्मवर्मगुप्तोच्चारणाद्यनेकविधविधिविशेषदर्शनात्। एवंवेदाभ्यासेऽप्यंत्ययोरध्यापनाधिकाराभावाद्विप्रत्वंनास्ति। ब्रह्मज्ञइत्यत्रव्याप्यव्यापकसाम्येनसर्वस्मिनाब्राह्मणत्वमित्यतिश्रेष्ठंप्रतिपादितं। परंतुजन्मतएवब्राह्मणत्वंवर्त्तते॥ एवंमानववचनोक्तशूद्रत्वमपि। यथाहमनुः॥

सद्यःपततिमांसेनलाक्षयालवणेन
च॥त्र्यहाच्छूद्रश्चभवतिब्राह्मणःक्षी
रविक्रयीति॥

इदंवचनंविकर्मब्राह्मणनिंदकंनतुशूद्रत्वप्रापकं। अत्रभवतैवोक्तंकिंखलुदुष्टोप्यश्वःसूकरोभवेदिति। अतोयथालौकिकेआजानेयाश्वस्यकेनचित्संगत्यादिदोषेणपंचधारागत्यादिविकलत्वेअश्वोगर्दभोजात

इत्युक्तिवत्। तत्रवस्तुतस्तु गर्दभोनजातः परंतुगु
णहीनत्वात्साम्यमात्रं। तथाऽत्रापिधर्मभ्रष्टत्वात्शू
द्रसाम्यमात्रमेवनतुशूद्रत्वं। अन्यथाप्रायश्चित्तादि
निष्कृतिर्नस्यात्॥ एवमेवसूर्यसोमादीनांपशुत्वकथ
नश्रुतेरभिप्रायोपिपशुत्वप्रतिपादकोनभवति य
थासिंहोदेवदत्तइत्यत्रदेवदत्तः सदापुच्छचतुष्पा
दसहितइत्यभिप्रायोनास्तिकिंतुसिंहतुल्यपराक्र
मीति। तथादेवाअपिपुच्छविषाणसहिताइतिन।
ज्ञानेनहीनाःपशुभिःसमानाइत्युक्तेः आदौविशेष
ज्ञानहीना आसन्ततस्तपसाभगवदाराधनेनप्रा
प्तज्ञानाबहुज्ञा आसन्निति। अन्येषांकिंवाच्यं सृ
ष्टिकर्तुर्ब्रह्मणोप्येवमेव। ब्रह्मणोवृत्तंभागवते २
स्कंधे ९ अध्यायेद्रष्टव्यं। सारांशस्तुभगवानेकएव
सर्वज्ञःस्वतंत्रः अन्येसर्वेऽपिपरिमितज्ञाअस्वतं
त्राश्चतद्रूपेनतदाज्ञयाचरंतीतिश्रुत्यर्थोभागवते
३स्कंधे २९ अध्याये॥

यद्वयाह्यनिवातोऽयंसूर्यस्तपतियद्वयात्॥ यद्वयाद्वर्षतेदेवोभगणोभातियद्वयादिति॥

एवंसूचनार्थःश्रुतेरभिप्रायः। अतोभागवते॥

परोक्षवादोवेदोऽयंबालानामनुशा
सनं॥ कर्ममोक्षायकर्माणि विधत्ते
ऽगदंयथेति॥

अत्रेदंतत्त्वमवगंतव्यं। यत्रस्वल्पापराधस्यात्यनिष्ट
फलंश्रूयतेतत्रतत्कर्मनिवृत्त्यर्थंभयप्रदर्शनमेव। य
थाऽल्पसुकृतस्यमहत्फलश्रवणंरोचनार्थंफलश्रु
तिरिति। नहिकुत्राप्युदुंबरुकचोरंशूलमारोपयंति।
नचदरिद्रतः कोऽपिधनप्राप्तिभवेत्॥ अतोयदुक्तंमा
नवेधर्मे॥

अधीत्यचतुरोवेदान्सांगोपांगेनत
त्वतः॥ शूद्रात्प्रतिग्रहग्राहीब्राह्मणो
जायतेखरः॥ खरोहादशजन्मानिष
ष्टिजन्मानिसूकरः॥ श्वानःसप्ततिज
न्मानिइत्येवंमनुरब्रवीदिति॥

एतच्छूद्रप्रतिग्रहनिवर्तकाभिप्रायकमेवनतुखर
त्वादिप्रापकं। अन्यथायथोक्तार्थस्यैववास्तवपक्षे
फलश्रुतेरपिवास्तवंस्यात्। तथासतिएतन्निष्कृति
रपिसुलभैव। यथाऽध्यात्मरामायण आरंभाध्याये॥

दुष्प्रतिग्रहदुर्भोज्यदुरालापादिसंभवं॥
पापंसकृत्कीर्तनेनरामगीता विनाश

येदिति॥

एवंचसंध्यावंदनभाष्येआचमनविधौ॥

गोकर्णाकृतिहस्तेनमाषमग्नंजलंपि
बेत्॥तन्न्यूनमधिकंवाऽपिसुरापान
समंभवेदिति॥

अत्रजलन्यूनाधिक्यमात्रेणमहापातकांतर्गतसु
रापानप्रापणंआस्तिक्यबुद्धिनाकर्मकर्तव्यंनोचेदेव
मितिभयप्रदर्शनार्थमेव। तत्वंतुवेदिकनिघंटौसु
रेतिजलनामापिवर्त्तते अतोन्यूनाधिकत्वेजलपान
समंभवेत्नत्वाचमनविधिसिध्यामायत्यंस्या
दिति। अत्राप्येतस्यवस्तुत्वेएतादृशफलश्रुतेरपिवस्तु
त्वंस्यात्॥यथाहरितालिकाव्रतकथायां॥

एवंविधिंयाकुरुतेचनारीभर्त्रासमं
सारमतेसुखेन॥विनाशकालेमम
तुल्यरूपंसायुज्यमुक्तिंलभतेसुखेन॥
अश्वमेधसहस्राणिवाजपेयशतानि
च॥कथाश्रवणमात्रेणतत्पुण्यंलभ
तेनरइति॥

अत्रज्ञानंविनाकैवल्यमितिज्ञानैकसाध्यस्यमोक्ष
स्यअर्थीसमर्थोविद्वान्जातपुत्रः कृष्णकेशीत्येवंवि

धाधिकारिणाद्रव्यश्रमसाध्यस्य यज्ञफलस्यचप्राप्तिः अनानुष्ठानमात्रेणकथाश्रवणेचस्त्रियाउक्ता। एतदस्तुत्वेसर्वशास्त्रविरोधः स्यात्। अतोरोचनार्थमेव। तच्च भयप्रदर्शनार्थमेवेति सिध्यं॥ एवमस्तीतिदुष्कर्मण्य निष्टफलंसत्कर्मणीष्टफलंसुतरांनास्तीतिनास्माभिरु च्यते। किंतु। तत्तत्कर्मयोग्यफलाफलकल्पनमेवोचि तमिति। अतउक्तमारंभे

धर्मस्यतत्वंनिहितंगुहायामिति॥

यत्रत्वपराधानुरूपंदुष्टफलश्रवणंप्रायश्चित्तादिकंचत त्रवास्तवमेवज्ञेयं। यथा॥ गुरुतल्पगामीसवृषणंशि श्नंपरीवास्यांजलावादायदक्षिणांदिशमनावृत्तिंव्रजे दिति॥ किंच॥

शूद्रीपरिवृतोविप्रःशूद्रीचगृहमेधि नी॥ वर्जितःपितृदेवेनरौरवंसोधिग च्छतीति॥

एवमादिस्थलेयथोक्तार्थएवग्राह्यः। एवंचेदपिपाति त्यसंपादकदोषेकृतेतुपतितएवनब्राह्मणइतिप्रथम मेवप्रतिपादितत्वान्नास्मन्मतविरोधः। एवंफलस्या पि। तेपुण्यमासाद्यसुरेंद्रलोकमश्नंतिदिव्यान्दिविदेव भोगानित्यादिस्थलेसकामविषयवस्तुत्वमेवबोध्य

मिति॥ मूलं॥ ज्ञानमपि ब्राह्मणोनभवतीत्यारभ्यनच ते ब्राह्मणाः स्युरित्यंतस्योत्तरं॥ ज्ञानतावद्ब्राह्मणो न भवतिशूद्रोपिनभवतिपरंतुज्ञानीत्वात्मैवमे मतमि तिभगवदुक्तेः ज्ञानीत्वत्युत्तमोभवेत्व्यासादयोज्ञान बाहुल्यादेवोत्तमा अभवन्तर्हियेयेज्ञानवंतः शूद्रा स्तेसर्वएवब्राह्मणाः स्युः। दृश्यंतेचक्वचित्शूद्राअपि वेदादिसर्वविद्याविशारदाः तेसर्वेब्राह्मणाः स्युरिति चेत्उच्यते। अत्रसांगवेदस्याधिकारिणाविधिवद धीतस्यैवसफलत्वात्। अधिकार्युपनयनसंस्कृतः। विधिस्तूपाकर्मणिवेदारंभंकृत्वागुर्वनुज्ञयाऽध्यय नंकर्तव्यमिति। प्राप्ताधिकारस्यापिगुर्वनुज्ञांविनाऽ ध्ययनकरणेदोषउक्तोमनुना।

ब्रह्मयस्त्वननुज्ञातमधीयानादवा
प्नुयात्॥ सब्रह्मस्तेयसंयुक्तोनरकं
प्रतिपद्यतइति॥

एवंसतिविनाधिकारपठनेकिमदृष्टंस्यात्शूद्रस्यतु वेदश्रवणेऽपिजतुभ्यांकर्णप्रपूरणमितिमह त्प्रायश्चित्तमुक्तंपठनंदूरतोपास्तमेव। तस्मिन्वेदा अपिनिर्वीर्याभवेयुः॥ यथाहुः॥

दर्भाःपिंडेषुनिर्मोल्याविप्राःप्रेता

न्नभोजने॥ वेदाःशूद्रेषुनिर्माल्यानि
र्माल्यश्चितिपावक इति॥

अतएवात्रसर्वत्रश्रुत्यर्थएवलिखितोनतुसाक्षात्
श्रुतिः। कुतः। वज्रसूचींशूद्रादयएवोररीकुर्वंतीति
तदवलोकनार्थमप्येतट्टंकलेखनमिति॥ अस्तुवेदा
न्माभूत्शास्त्रादिनाज्ञानसिध्यिर्भवेदितिचेन्न। यथा
भागवते।

शब्दब्रह्मणिनिष्णातोननिष्णायात्परेयदि॥श्रमस्तस्यश्रमफलोह्यधेनुमिवरक्षतइति॥

शास्त्रपठनात्घटपटादिसामान्यज्ञानंवारिजयकारकंभवेत्तेनव्यवहारविषयेश्रेष्ठत्वंस्यात्परंतुभगवद्विषयकज्ञानंविनापरमार्थविषयेश्रैष्ठ्यंनस्यात्। यथाहुः॥

त्वन्मायायाकमलनाभविमोहितस्य
विद्यावतोजडमतेरपिकोविशेषः॥
गाढांधकारकवलीकृतलोचनानामु
न्मीलनेनकिसुताथनिमीलनेनेति॥

अतस्तज्ज्ञानंविलक्षणमेव। यथाह भगवान्॥

नहिज्ञानेनसदृशंपवित्रमिहविद्यते॥

ज्ञानंलब्ध्वापरांशांतिमचिरेणाधिग
च्छतीति॥

एवंविधस्तुब्रह्मविद्ब्राह्मणोभवेदित्युक्तेः ब्राह्मणो
पिभवेत्परंतुतस्यस्थितिरेवं॥

नाहंमनुष्योनचदेवयक्षौनब्राह्मण
क्षत्रियवैश्यशूद्राः॥नब्रह्मचारीनगृ
हीवनस्थोभिक्षुर्नचाहंनिजबोधरूप
इति॥

अतएवविधिनिषेधावपिनस्तइत्याह॥

कार्याकार्यैकिमपिसततंनैवकर्तृत्व
मास्तेजीवन्मुक्तस्थितिमुपगतोदग्ध
वस्त्राद्यभासः॥एवंदेहेप्रविलयगते
तिष्ठमानोविमुक्तोनिस्त्रैगुण्येपथि
विचरतःकोविधिःकोनिषेधइति॥

नन्वयमेतादृशइतिकथंज्ञेयमितिचेत्। लक्षणेर्ज्ञे
यमित्याह॥

दुःखेष्वनुद्विग्नमनाःसुखेषुविगत
स्पृहः॥वीतरागभयक्रोधःस्थितधी
र्मुनिरुच्यतइति॥

एतादृशास्थित्यासिद्धिलब्धशापानुग्रहसामर्थ्यन

मूलं॥ अथवेदेनापिब्राह्मणोनभवति। इत्यायस्योत्त
रं॥ अत्रवेदमूलमिदंब्राह्म्यमित्युक्तेः ब्राह्मणस्यसम
स्तकर्मसुवेदमंत्रावश्यकत्वात्वेदेनैवब्राह्मणोभवति।
रावणोब्राह्मणएवप्रत्युताहिताग्निरपि। ब्राह्मणोने
त्युक्तिर्मोहादेवेति। यथाहाध्यात्मरामायणे रावणंप्रति
तत्रारः शुकः।

अतस्त्वंब्राह्मणोभूत्वापौलस्त्यतनयो
पिसन्॥ अज्ञानीवसदाभोगानत्तुधाव
सिकिंमुधेति॥

रावणवधानंतरमपि॥

चित्यांनिवेश्यविधिवत्पितृमेधवि
धानतः॥ आहिताग्नेर्यथाकार्यंरावण
स्यविभीषणः॥ तथैवसर्वमकरोद्बंधु
भिः सहमंत्रिभिरिति॥

तर्हिरामस्यब्रह्महत्याजातेतिचेन्न॥

आततायिनमायांतमपिवेदांतपार
गं॥ जिघांसंतंजिघांसीयान्नतेनब्रह्म
हाभवेदित्युक्तेः।

रावणस्यदारहरणशस्त्रपाणित्वेनप्रबलाततायित्वा
त्। तथाऽपि। हंतव्योब्राह्मणोनहीतिश्रुत्यर्थपर्यालो

त्वनेनपापमधिकंमत्वातन्निष्कृत्यर्थंसेतुबंधसन्निधौ रामेश्वरस्थापनंकृतवान्रामः। अतएवतद्दर्शनेनाकस्मिकब्रह्महत्यापापनिवृत्तिरुक्तापराशरेण। ब्रह्मघ्नेसेतुदर्शनमिति। एवंचेत्रामोमनुष्यइतिनिश्चितंभवेदितिचेन्न। कुतः। उत्सीदेयुरिमेलोकानकुर्यांकर्मचेदहमितिलोकसंग्रहार्थंकृतमितिज्ञेयं। अतः।

रामोनारायणः साक्षाद्रावणोब्राह्मणो मतइति॥

एवंस्थितेऽपिभवताब्राह्मणत्वंनशास्त्रेणेत्यादिना सर्वथैवनिराकृतं। पुनश्च। कुंदेंदुधवलंहिब्राह्मणत्वंनाम सर्वपापापाकरणमितिस्वरूपमुक्तं। एतेनब्राह्मणत्वंनामैकमुत्तममस्तीतिनिश्चितं। अथतस्यलक्षणविचारःकार्यः। भवताचात्रव्रततपोनियमेत्यारभ्यतंदेवाब्राह्मणंविदुरित्यंतेनलक्षणमुक्तं। क्षांत्यादिभिर्गुणैर्युक्तइत्यादिवेश्यांपायनवचनैरपि। एतत्सर्वमपिवचनजातंसुगुणस्तावकंनतुब्राह्मणत्वलक्षणप्रतिपादकंव्यभिचारदर्शनात्। स्तावकंचयथाभस्त्युत्कर्षवर्णनेभागवते॥

विप्राद्द्विषड्गुणयुतादरविंदनाभपादारविंदविमुखात्श्वपचंवरिष्ठंमन्येऽसा

दिना।

तृतीयस्कंधे २३ अध्यायेऽपि॥

यन्नामधेयस्मरणानुकीर्तनाद्यत्प्रह्व
णाद्यत्स्मरणादपिक्वचित्॥ श्वादोपि
सद्यः सवनायकल्पतेकुतः पुनस्तेभ
गवन्नुदर्शनादिति॥

टीकायांश्रीधरस्वामी॥ सवनायसोमयागायकल्प
तेयोग्योभवति। अनेनपूज्यत्वंलक्ष्यतइति। एवं।

चंडालोपिहिवृत्तस्थस्तंदेवाब्राह्मणं
विदुरित्यत्र॥

अपिशब्दस्वरसात्क्षांत्यादिगुणानामुत्कर्षप्रतिपादन
एवचनाभिप्रायोनतुचंडालस्यब्राह्मणत्वप्रतिपादने।
यथा। अपिवामातरंगच्छेन्नतुगंगाप्रतिग्रहमित्यत्रा
पिशब्दस्वरसादेवगंगाप्रतिग्रहस्यात्यंतगर्हणंदर्शि
तंनतुविधिलिंडः प्रयोगेऽपिमातृगमनविधिर्दर्शितः
अनर्थापतेः। एवमत्रापीतिध्येयं। अथवा। चंडस्त्वत्यं
तकोपनइतिकोशोक्तेः अलंपर्याप्तंचंडः चंडालइति
व्युत्पत्त्यादीर्घात्यंतकोपनोपीति। अतएवभृगुदुर्वासोज
मदग्न्यादयोपिब्राह्मणाइति। अन्यच्च। देवमानुषनारी
णामित्यादिना सुतरांमैथुनत्यागस्यैवब्रह्मलक्षणत्वंमुक्तं।

एतस्यैवस्तुतेब्राह्मणस्यविवाहविधिरेवनस्यात्। तथा सतियज्ञादीनांनिवृत्तिः। तथाचऋणत्रयानिवृत्तिः ब्राह्मणाभावश्चेत्यनेकानर्थापत्तिः स्यात् अतोमैथुनत्यागोधर्मपत्नीतरस्त्रीविषयएव। धर्मपत्नीगमनंतु विधिप्राप्तंधर्म्यं। अतएवभगवान्॥

धर्मविरुद्धोभूतेषुकामोस्मिभरतर्षभेति॥

तस्मात्सुतरांमैथुनत्यागोक्तिर्निरर्थकेवेति॥ किंच॥ तमहंब्राह्मणंब्रूयांद्वेषाः शूद्रायुधिष्ठिरेतिवचनंतु। यथा। सर्वचर्णेषुतेशूद्रायेत्यभक्ताजनार्दने। इत्यत्र सर्वचर्णेष्वित्यनेनैवपृथक्निर्देशात्। शुचाद्रवंतीतिशूद्राइतिव्याख्यानोक्तित्यंतथैवेदमपिव्याख्येयं। अन्यथासमोक्तोब्राह्मणब्रुवाईत्यादिवचनानामानर्थक्यंस्यात्। अपिच। शूद्रोपिशीलसंपन्नइत्यादिपंचेंद्रियार्णवंघोरमित्यादिश्लोकद्वयमपिस्तावकमेव। कुतः॥

दुःशीलोपिद्विजःपूज्योननुशूद्रोजितेंद्रियः॥ कःपरित्यज्यगांदुष्टांदुष्प्रच्छीलवतींखरीमितिन्यायोपबृंहितवचनविरोधात्॥

एवमेवसदाचारदर्शनाच्च॥ अथपूर्वव्यभिचार

दर्शनादित्युक्तंकथंतदित्यपेक्षायामाह॥ पूर्वोक्तगुणप्र
शंसावचनजातस्यब्राह्मणत्वलक्षणत्वेयत्रैते गुणाः
संतितत्रैवब्राह्मणत्वंयत्रनसंतितत्रब्राह्मणत्वंनास्ती
तिवक्तव्यं। एवंचेत्इंद्रियनिग्रहायुक्तसर्वगुणाविदु
रेआसन्परंतुसब्राह्मणोनजातः शूद्रएवासीत्। तंत्रे
वश्रेष्ठत्वमात्रं। एवमपिननियतत्वंतएवगुणाभीष्मे
ऽप्यासन्नतुक्षत्रियएव। एतादृग्गुणवानेवश्रावणो
योमृगयायांराज्ञावज्जानताराज्ञादशरथेनहतः सतुवै
श्यएव। तस्यवैश्यत्वंकथंज्ञातमितिचेत्तस्यैववचने
न। तथाचाध्यात्मरामायणेदशरथः॥

तदोमामाहसमुनिर्माभैषीर्नृपसत्त
म॥ ब्रह्महत्यास्पृशेन्नत्वांवैश्योऽहं
तपसिस्थितइति॥

अनेन। तपसाब्राह्मणोजातस्तस्माज्जातिरकारणमित्यु
क्तिर्व्यभिचरिता॥ अथ। एतद्विपरीतगुणारावणेआ
सन्। यथाहरावणवधानंतरंरामंप्रतिविभीषणः॥

नृशंसमनृतंक्रूरंत्यक्तधर्मव्रतंप्रभो॥
नाहोस्मिदेवसंस्कर्तुंपरदाराभिमर्शि
नमिति॥

सतुब्राह्मणएवेतिप्रागेवप्रतिपादितंनतुचंडालः॥

अत्रराक्षसत्वमप्यागतंपरंतुवाल्मीकिरपिपूर्वमेतादृशा एवासीत्यथाहरामंप्रतिवाल्मीकिः॥

अहंपुराकिरातेषुकिरातैःसहवर्धितः॥जन्ममात्रद्विजत्वंमेशूद्राचाररतःसदा॥शूद्रायांबहवःपुत्राउत्पन्नामेऽजितात्मनः॥ततश्चौरैश्चसंगम्यचौरोऽहमभवंपुरा॥धनुर्बाणधरोनित्यंजीवानामंतकोपमइति॥

एवंविधोपिसमर्षिप्रसादादृषिर्जातः। एतेन ब्राह्मणःकेनचिदंतरायेणकदाचित्कर्महीनश्चेदपितस्यब्राह्मणत्वंननश्यतिकिंतुमलिनंभवतिपुनश्चतपसापुटपाकशोधितसुवर्णवत्तेजस्वीभवेदितिज्ञापितं॥ एवंविदुरादिषुतद्गुणसत्वेऽपिब्राह्मणत्वाभावः रावणादिषुगुणाभावेऽपिब्राह्मणत्वसत्वमितिअन्वयव्यतिरेकाभ्यांव्यभिचारःस्पष्टएवअतोनैतल्लक्षणसुचितमिति॥ तर्हिब्राह्मणस्यकिंवालक्षणमित्युक्ते यजनयाजनाध्ययनाध्यापनदानप्रतिग्रहाख्यषट्कर्माधिकारित्वमेवब्राह्मणस्यलक्षणमिति॥ अधिकारित्वमात्रकथनेनानाहिताग्न्यादीनाव्याप्तिः। तेनविनाकरणात्सरभूसंज्ञादीनातिव्याप्तिः। परधर्मत्वेनफलव्य

भिचाराच्च। अनुत्पन्नाधिकारिणिमृतेउत्पन्नविनष्ट घटलक्षणमत्राप्यनुसंधेयं। अनेनयत्राधिकारित्वं तत्रब्राह्मणत्वंयत्राधिकारित्वंनास्तितत्रब्राह्मणत्वम पिनास्तीतिलक्षणसमन्वयोजायते॥ ननु। अनाहिता ग्न्यादौकर्माकरणेऽप्यधिकारित्वंपरभूसंज्ञादौकर्म करणेऽप्यनधिकारित्वंकथंज्ञेयमितिचेत्लोकप्रसि ध्यैव। तर्हिलोकप्रसिध्यिः अद्दल्कादरनामकेयवने गणःपत्योब्राह्मणइत्यासीत्तत्रातिव्याप्तिरितिचेदु च्यते। कूटकार्षापणादिव्यवहारस्यतद्वास्तवाज्ञानका लेएकदेशेसत्यत्वाभासेनप्रतीयमानत्वेऽपितज्ज्ञेनज्ञा तेसदंडंपुनर्यथायोग्यव्यवहारेस्थापनंक्रियतएव। एवमत्रापिपरिणामेशिक्षादिदर्शनंजातमेवातःसार्व जनीनप्रसिध्याऽधिकारित्वज्ञानेनदोषावकाशइति॥ यजनादीनांविवरणंवृहट्टीकेद्रष्टव्यं॥ यजनायुक्तसम ग्रस्यैकेनकेनापिकर्तुमशक्यत्वादेवाधिकारित्वमात्रक थनं॥ ननु।

> यस्यवेदश्चयेदीचचिच्छिद्येतेत्रिपूरु षं॥ सवैदुर्ब्राह्मणोनामसर्वकर्मबहि ष्कृतइति।

कर्माकरणेदोब्राह्मण्यमुक्तंकथमधिकारित्वमात्रेण

सिद्धिरितिचेन्नैवं। एतद्वचनस्यनिंदाश्रवणेनतत्कर्म प्रवर्त्तकाभिप्रायत्वात्। अन्यथाबहुधाब्राह्मणाभावएव स्यात्। भवतुकिमर्थंपोषणंक्रियतइतिचेत्श्रुतिविरोधश्च। तथाचश्रुत्यर्थः॥

ब्राह्मणस्येषमहिमानित्योनोक्षीयते
क्वचित्। वर्धतेकर्मणानैवतस्माद्ब्रा
ह्मणउत्तमइति॥

एवमपिसर्वमेवनत्याज्यं। यजनेअकरणान्मंदकरणं। अध्ययेनेयावदध्ययनंयत्किंचिद्वा। दानंचविभवानुसारतः। अन्यथानिंदाप्राप्तिः नतुब्राह्मणत्वहानिःपरंतुकर्मकरणमंदकरणाकरणैरुत्तममध्यमाधमत्वं स्यात्। अतएवब्राह्मणेष्वप्यनेकभेदाजाताः। अत्रसर्वानपिकथयितुमशक्यत्वात्कांश्चिद्वक्ष्यामः॥ मुख्यस्तुवेदचतुष्टयतः शास्त्राच्चतुष्टयात्मकः समानएव। अस्मिन्नेवदेशादिनामतः न्यूनाधिक्यभेदाजाताः। यथा॥

आंध्राः कर्णाटकाश्चैवगुर्जराद्रविडा
स्तथा॥ महाराष्ट्राइतिख्याताः पंचैते
द्रविडाः स्मृताः॥ सारस्वताः कानकु
ब्जागौडाउत्कलमैथिलाः॥ गौडाइ

तिसमाख्याताः पंचैतेमुनिसत्तमैरिति॥

ननुकानकुब्जाउत्कलामांसमत्स्यभक्षणंकुर्वंतितत्तु आकाशगामिनोविप्राः पतंतेमांसभक्षणादितिनिषिद्धं। अतएतेकथंब्राह्मणाइतिचेत्। उच्यते। एवंसामान्यतो निषिद्धेऽपियुगांतरेविशेषविधिरासीत्। यथा॥

ब्राह्मश्वशल्ककीगोधाकूर्मःखड्गश्चपंच मः॥ पंचपंचनखाभक्ष्यामांसभक्षीनदो षभाक्॥

इत्यादिनामांसभक्षणे। जातिभेदेनमत्स्यभक्षणेऽपि॥ तथापाठीनराजीवशल्यकाश्चद्विजातिभिः॥ सिद्धास्त्वरो हितावाद्यौनियुक्तौहव्यकव्ययोरिति॥ एतत्कलौनिषि द्धंतैर्नादृतं॥ एवमाद्यामातुलकन्यापरिणयंकुर्वंति तदप्यनुचितमेवभाति। कुतः यथापितृव्यकन्याभगि नीतथामातुलकन्याऽपिस्वसारंमातरंविनेतिसापिंडय निर्णयेनिषिद्धं अत्रकथमितिचेदुच्यते। एतन्निर्णयो गाणेशेभारततात्पर्ये॥

भ्रातृव्यस्त्रोःसुतौभ्रातृष्वसारौयदिशो नक॥ सप्तमादूर्ध्वमप्येषसंबंधश्छि द्यतांकथं॥ तस्मात्तयोःस्वस्रभ्रातृभा वोभाक्कोविगोत्रयोः॥ दांपत्यभावस्तु

तयोर्मैत्रलिंगात्परिस्फुटः॥ योषापत्यं मातुलीयंयथाभागःपितृष्वसुः॥पुत्रस्यै वंपतेऽमुंजुषस्वेंद्रेत्यृषिर्जगोइति॥

अतोमातुलकन्यायांभगिनीत्वकथनंमोहादेवेतिप्रतिभातिदंपत्यभावस्तुश्रुतिसिध्दइति। एवंस्थितेऽपि वाजसनेय्यादिशाखांतरेषुनिषेधपर्यवसानंदृश्यतेतेषामृषिसंमतंतथैवेत्यतउक्तंतथामुनीनांमतयश्चभिन्नाइति। किंच। महाराष्ट्रायादासीगमनंकुर्वंतितच्च। शूद्रीपरिग्रहोविप्रः शूद्रीचगृहमेधिनीत्यादिनानिंदितमेतत्कथमितिचेत्। युगांतरेवर्णचतुष्टयदारग्रहणं ब्राह्मणस्यासीत्कलौनिषिध्दंतैर्नादृतं। एवंचधर्मद्रोणिस्थोदकपानमपीत्येतत्सर्वंदेशाचारेणव्यवस्थितं॥ यथाहुः॥

उद्वह्यतेदक्षिणात्यैर्मातुलस्यसुता द्विजैः॥ दासीसंगोमध्यदेशाउदङ्मांस स्यभक्षणं॥ मत्स्यादाश्चनराः पूर्वेव्यभिचाररताः स्त्रियः॥ पश्चिमेबाडबा श्चर्मद्रोणिस्थजलपायिनः॥ अनेनकर्मणानेतेप्रायश्चित्तदमार्हकाइति॥

अतोनिंदाऽपिनकार्येत्याहपराशरः॥

युगेयुगेचयेधर्मास्तत्रतत्रचयेद्विजाः॥
तेषांनिंदानकर्तव्यायुगरूपाहितेद्विजा
इति॥

मूलं॥ अन्यच्चभवतोक्तंइहशूद्राणांप्रव्रज्यानविधीय
तइत्यारभ्यब्राह्मणशुश्रूषैवतेषांधर्मोनभवतीत्यंत
स्योत्तरं॥ शूद्राणांनीचत्वंतुपभ्यासुत्पन्नत्वेनश्रुत्येवा
भिहितं। एतदेवमुख्यहेतुःएनंपुरस्कृत्यानुवादकत्वे
नचतुर्षुवर्णेष्वंतेवचनादित्यादिरपिसंगच्छते। अत्रे
दंतत्वं। यत्रपाठक्रमवदेवार्थक्रमस्तत्रमुख्यत्वमेव।
यत्रपाठक्रमेबाधस्तत्रार्थक्रमेबाधः। श्वयुवमघोना
मित्यत्रपाठक्रमेगृहीतेइंद्रस्यनीचत्वंस्यात्तथासति
योग्यताविरहःतेनचवाक्यप्रामाण्यप्रसंगइतितत्रा
र्थक्रमएवग्राह्यः। ब्रह्मक्षत्रविट्शूद्राइत्यत्रमुख्यत्व
मेवेति॥ तर्हिगंगाऽपिभगवत्पदोत्पन्नत्वादेवभगव
त्पदीत्युच्यतेअतःसाऽपिनीचास्यादितिचेन्न। एकां
गोत्पन्नत्वेऽपिसंतत्युच्चरयोरिवगंगाशूद्रयोरप्युपादे
यहेयत्वेनमुख्यनीचत्वस्यप्रसिद्धत्वात्॥ अपिच।
स्त्रीशूद्रद्विजबंधूनांत्रयीनश्रुतिगोचरेतिभागवतप्रथ
मस्कंधेसूतोक्तेःवेदानधिकारादेवप्रव्रज्याऽनधिकार
इति। भवत्प्रतिज्ञातुवेदाःप्रमाणंस्मृतयःप्रमाणमि

त्यादिना। एवमपिस्थितेशुश्रूषाविषयेपरिचर्यात्मकं कर्मशूद्रस्यापिस्वभावजमितिभगवद्वचनेजात्यपि कथंनेतिब्रूते। विनावचनप्रमाणमेवप्रव्रज्याकथंविधीयते। अतएवमसदाग्रहेणभवान्शूद्रपरिव्राजकइतितर्क्यते॥ मूलं। किंचाप्यन्यद्वदीयमतंमुखतोब्राह्मणोजातइत्यारभ्यतेषामपिब्राह्मणसंज्ञाक्रियतइत्यंतस्योत्तरं॥ आबध्यकृमिमसदाजटिलांसमितिरारोपितोमृगपतेःपदवींयदिश्वा॥ मत्तेभकुंभतटपाटनलंपटस्यनादंकरिष्यतिकथंहरिणाधिपस्य॥ एवमेवसंस्कारैःशूद्राणांब्राह्मणत्वमिति॥ मूलं। एकवर्णेनास्तिचातुर्वर्ण्यमित्यारभ्यैवंब्राह्मणादीनांकथंचातुर्वर्ण्यमित्यंतस्योत्तरं॥ यद्येकस्माज्जाताःसर्वेसमानाएवेतिचेद्भवन्मतंतर्हिपशुपक्षिमृगादीनामपिभगवतएवोत्पन्नत्वात्हंसाःकाकाःकृष्णसाराःश्वानःअश्वागर्दभाइत्यादिषूत्तमाधमत्वंनस्यात्तेनभवतःअश्ववाहनवद्गर्दभयानमपीष्टंस्यात्नत्तुलोकेऽत्यंतंनिंद्यं। यथा॥

बालगवित्वमकारणहास्यंस्त्रीषुविवादमसज्जनसेवा॥ गर्दभयानमसंस्कृतवाणीषट्सुनरोत्तघुतामुपया

तीति॥

अहो किमेवमुच्यते॥ मूलं। इहहि गोहत्यश्वेत्यारभ्यै कएववर्णोभवतीत्यंतस्योत्तरं॥ अत्रराजतद्वाह्मनयो र्मनुष्यत्वाश्वत्ववभेदाभावेऽपिराजतभृत्ययोःसेव्य सेवकभावेनमुख्यनीचत्वभेदोयथालोकप्रसिद्धः तथाऽत्रापिअभिवादनाशीर्वादकर्तृत्वेनभेदव्यवहारद र्शनात्। ननु। अभिवादनशास्त्रे।

ऊर्ध्वंप्राणात्प्रुत्क्रांतियून.स्थविरआ
गते॥ प्रत्युत्थानाभिवादाभ्यांपुनस्ता
न्प्रतिपद्यतइति॥

वयोविशेषस्यैवोक्तत्वात्कथंब्राह्मणएवाभिवाद्यइ त्युच्यतइतिचेत्। ज्येष्ठत्वंचब्राह्मणएवोक्तं। यथा मनुः॥

ब्राह्मणंदशवर्षंतुशतवर्षंतुभूमिपं॥
पितापुत्रोविजानीयाद्ब्राह्मणस्तुत
योःपितेति॥

अतएवभोजराजः॥

उच्चैर्गतिर्जगतिसिध्यतिधर्मतश्चे
त्तस्यप्रमाचवचनैःकृतकेतरैश्चेत्॥
तेषांप्रकाशनदशाऽपिमहीसुरैश्चे

त्वानंतरेणनिपतेत्कनुमत्प्रणामइ
ति॥

अतएवमहाजनोयेनगतःसंपंथाइत्युक्तं॥ मूलं। इदंचावगम्यतांयथैकवृक्षोत्पन्नानामित्यारभ्यैक पुरुषोत्पन्नत्वादित्यंतस्योत्तरं॥ अत्रयथावृक्षस्य बुध्नाच्छिखरपर्यंतसमानत्वंतथापुरुषावयवानामपिनोत्तमाधमत्वमतोमुखात्पादपर्यंतमुत्पन्नानां समानत्वमिति। अवयवसाम्यंप्रतिपादितं। एवंचेत्यथाशिरसिकरधारणेनप्रसादोधात्संतोषोभवतितथापादधारणेनापिभवेत्। एवंकचित्कस्यापिनभवति। अन्येषांभेदबुध्दीनांनभुभवान्समबुध्दिःभवतोभवेत्। अतःपादत्राणंशिरसिधृत्वाशिरस्त्राणंपादेकृत्वासभायांसन्मानंलभतेचेत्भवदुक्तिर्भवत्कृतेसत्येत्यंगीकुर्मः। एवंकर्तुंभवानपिनशक्नोतितदामनस्यन्यद्वचस्यन्यत्कार्यमन्यदुरात्मनामितिदोषआपतत्। अतःस्वोक्तिनिर्वाहार्थंनिरपत्रपःसन्यद्यपिकरोतिभवान्तथाऽपिसभासदोनसभ्यंमन्येरन्प्रत्युतछकारेकारथकारोकारसंयोगोच्चारणेनन्यक्कुर्वीरन्। अतोवैदिकलौकिकविरुध्दंकथंजल्पति। तथाचमनुः॥

उर्ध्वनाभेर्मेध्यतरः पुरुषः परिकीर्तितः॥ तस्मान्मेध्यतमंत्वस्य मुख मुक्तंस्वयंभुवेति॥

तस्माद्ब्राह्मणस्यश्रैष्ठ्यमभ्याहृतमेवेति॥ मूलं। अन्य च्चदूषणंभवतियदिमुखतोजातोब्राह्मणोब्राह्मण्याः कुतउत्पत्तिरित्यारभ्यानियतंब्राह्मण्यमित्यंतस्योत रं॥ अनयोक्त्यास्वयोग्यतांप्रकटीकृतवान्यथाहमाघः॥

सहजांधदृशः स्वदुर्नयेपरदोषेक्षण दिव्यचक्षुषः॥ स्वगुणोच्चगिरोमुनिव्रताःपरवर्णग्रहणेष्वसाधवइति॥

अहोअत्रमदुर्नयः कोवेतिचेत्शृणु। ब्रह्मकुतउत्पन्ना। भवन्मतेपृथगवयवांगीकाराभावेऽपिएकस्मादुत्पन्नत्वादेवैकेवजातिरितिभवत्संमतमेव। अतः ब्रह्मणा अपितस्मादेवोत्पन्नत्वात्भवादृशानामपिदुर्निवार्यएवभगिनीप्रसंगः। अथयदिमन्यसेअनभिहितमप्यन्यायग्रहणात्युक्तसंगेनतद्दोषान्मुक्तइति। हंततर्हिभवत्पितातेनदोषेणविनाभवंतंकथमुत्पादितवान्। अतस्त्वत्पितामगिनीगामीत्वंशुधः किं। नहिलोकेयत्रकुत्रापिपतितपुत्रः शुचिर्दृष्टः। एतत्सर्व

मविचार्यैवदोषोद्घाटनंहास्यास्पदमेव। यथाहुः॥

यदन्योषविलक्षणार्थवादेरविचारा
र्थमनुविकल्प्यतर्कैः॥ परिदूषयितुं
प्रवृत्तमात्रः परिहासास्पदतामुपेति
लोके। इति॥

मूलं॥ सर्वेवैयोनिजामर्त्याइत्याद्यस्योत्तरं॥ एतद्व
चनमसंबध्यमेवलक्ष्यते। अगस्त्योगस्तिपुष्पाच्चे
त्यादिनास्यपूर्वोदाहृतवचनविरोधात्। द्रोणाचार्या
दीनांअयोनिजत्वंपुराणादिषुसर्वत्रप्रसिध्यमतएतद्व
चनंहेयमेवेति॥ मूलं॥ एकवर्णमिदंपूर्वविश्वमासी
द्युधिष्ठिरेत्यादिवैशंपायनवचनस्योत्तरं॥ एतद्वचन
स्यापिपूर्ववचनसाहचर्यमेवप्रतिभाति। श्रुतिविरो
धात्। तथाचश्रुत्यर्थः॥

धातायथापूर्वमेवाकल्पयज्जगदादि
तः॥ अनीदृशंजगत्क्वापिनकदाचि
द्भवेदिदमिति॥

स्मृतिश्चयमनुः॥

सर्वेषांतुसनामानिकर्माणिचपृथक्
पृथक्वेदशब्देभ्यएवादौपृथक्संस्था
श्चनिर्ममेति॥

शारीरकसूत्रंच॥

शास्त्रइतिचेन्नातःप्रभवात्प्रत्यक्षानुमानाभ्यामिति॥

एवंसर्वत्रवेदशास्त्रतएवजगदुत्पतिरुक्ता। वेदेऽपिमुखतोब्राह्मणोजातइत्याद्यर्थोदर्शितः। भगवताऽपि। चातुर्वर्ण्यंमयासृष्टंगुणकर्मविभागशइत्युक्तमतःस्रष्ट्यादितएववर्णव्यवस्थेतिसिद्धं॥ अन्यथावेदानामप्यादिमत्वप्रसंगःतेनतेषामपिपौरुषेयत्वेनप्रमाणानर्हत्वं। तथासतितदनुगतस्मृत्यादीनामप्यप्रामाण्यमेव। ततोवेदाःप्रमाणंस्मृतयःप्रमाणमित्यादिनोक्तभवत्प्रतिज्ञाभंगश्चेत्यनेकानर्थापत्तिःस्यात्॥ अतएतद्वचनमपिहेयमेवेतिनेष्कर्षः॥ ननुयदिभगवताप्रथमतएवचातुर्वर्ण्यंविहितंतर्हिसर्वत्रकिमितिनरुतं। वर्णव्यवस्थितिरिहैवकुमारिकाख्येइति। इहभारतवर्षएवकौमारिकाखंडेवर्णव्यवस्थितिः किमर्थंरुतेतिचेत्उच्यते। अस्यैवकर्मभूमित्वात्गुणकर्मविभागशएववर्णविधानात्। भरतवर्षंच। तुषाराद्रेर्लंकावधिभरतवर्षंनिगदितमिति। हिमालयतःलंकावधि। अत्रैवाहोरात्रस्यात्यंतवृद्धिक्षयाभावात्। अतिशीताभावाच्चप्रातःशीतोदकस्नानसंध्याहो

मादिकर्मयोग्यत्वात्कर्मभूमित्वं। परंतस्तुशीताधिक्येनोदकंघनीभूतंजायतेतत्रशौचविधिरेवकर्तुमशक्यःस्नानादिकंतुदूरतएव। यथोक्तं॥

यदत्रजागर्तिशिवाससंहिमंसुचीतलागंधवहाश्चदुःसहाः॥जलावगाहाश्चकितोनरोयतःकुतस्तनुष्वास्यतिकर्मनिर्मलमिति॥

अन्यच्चज्योतिःसिद्धांतशिरोमणौ॥

लंबाधिकाक्रांतिरुदक्चयावत्तावद्दिनंसंततमेवतत्रइत्येव

इत्येवंअक्षांशलंबांशाक्रांतिवशाद्यत्रयत्रात्रत्यपक्षमासर्तुमासकालावध्येकमेवदिनंभवेतत्रस्नानसंध्यादिकर्मणोतिकालविलंबेनानुपपतिः। सायंप्रातर्द्विजातीनामशनंश्रुतिचोदितमितिदिवाभोजनद्वयनिषेधात्तावतिदिवसेभोजनद्वयाभावेसतिप्राणधारणमेवनस्यादितिपरमकारुणिकेनभगवतालोकसौख्यार्थमेवैवंकृतमितिज्ञेयं॥ इतरवर्षेषुच। शेषेषुचांत्यजजनानिवसंतिसर्वेइतिएकेचजातिर्विहिता। तत्रत्यानांकर्मकरणाशक्यत्वेऽपितत्रेतरसदाचरणेनैवकृतार्थतासिध्यर्थंभगवतातेष्वे

वावतारंधृत्वातन्म्लेषयैवसेश्वरंशास्त्रंविहितं। य
थाऽस्मच्छास्त्रेऽपि॥

परापवादेयेमूकाःपररत्नीषुनपुंसकाः
परद्रव्येषुयेचांधास्तेषांगंगापदेपदे
इति॥

तस्माद्दूर्णव्यवस्थितिरादितएवास्ति॥ अस्तुवापूर्वं
कथमपितथैवाधुनाप्याचारःसर्वत्रनसंभवति। य
युच्यतेऽस्माभिस्तथैवाचरिष्यतइति। अत्रभव
ताऽपिम्लेच्छादिकैःसहभोजनंकर्त्तुनशक्यते। तुरु
ष्काहूणाश्चसर्वैःसहभोक्तुंशक्नुवंतिपरंतुतेऽपिवि
वाहेसोदरभगिनींकिमितित्यजंति। सृष्ट्यादौतुए
कस्यैवशरीरात्स्त्रीपुरुषावुत्पन्नौतन्मिथुनात्सर्वेजा
ताः। यथास्मृतिसंहितायां॥

द्विधाकृत्वात्मनोदेहमर्धेनपुरुषोऽभ
वत्॥अर्धेननारीतस्यांसविराजमसृ
जत्प्रभुरिति॥

अतएवनदेवचरितंचरेदित्युक्तंचरितंतुशास्त्रोक्तंच
रेत्। यथाहभगवान्।

तस्माच्छास्त्रंप्रमाणंतेकार्याकार्यव्य
वस्थितावितिः॥

ग्रास्तीतिग्रास्त्रंविधिरूपंवेदःसएवप्रमाणं॥ ब्राह्म
णविषयेश्रुत्यर्थः॥

यावंत्योदेवतालोकेताःसर्वाब्राह्मणे
स्थिताः॥तस्माद्ब्राह्मणवर्येभ्योवेदवि
भ्यस्तुदर्शने॥दर्शनेनमनंकुर्यान्नाप्री
तिंकीर्तयेत्कदा॥एवंकृद्देवताएताः
प्रीणात्येवनसंशयइति॥

स्मृतिश्चमनुः॥

उत्तमांगोद्भवाज्ज्येष्ठ्याद्ब्रह्मणश्चैवधा
रणात्॥सर्वस्यैवास्यसर्गस्यधर्मतो
ब्राह्मणःप्रभुरित्यादि॥

अतएवतद्भरणमपिराज्ञाकर्त्तव्यमित्याह॥

ब्राह्मणान्भरराजेंद्रपुनश्चब्राह्मणा
न्भर॥तस्मात्सर्वप्रयत्नेनपुनश्चब्रा
ह्मणान्भरेति॰

वीप्सयोक्तं॥अन्यथाद्वेषेअनिष्टफलमपिदर्शितं।
यथा॥

गतश्रीर्गणकंद्वेष्टिगतायुश्चिकित्स
कं॥गतश्रीश्चगतायुश्चब्राह्मणान्द्वे
ष्टिभारतेति॥

शास्तीतिशास्त्रंविधिरूपंवेदःसएवप्रमाणं॥ ब्राह्मणविषयेश्रुत्यर्थः॥

यावंत्योदेवतालोकेताःसर्वाब्राह्मणेस्थिताः॥तस्माद्ब्राह्मणवर्येभ्योवेदविभ्यस्तुदर्शने॥दर्शनेनमनंकुर्यान्नाप्रीतिंकीर्तयेत्कदा॥एवंरुद्रदेवताएताःप्रीणात्येवनसंशयइति॥

स्मृतिश्चमनुः॥

उत्तमांगोद्भवाज्ज्येष्ठ्याद्ब्रह्मणश्चैवधारणात्॥सर्वस्येवास्यसर्गस्यधर्मतोब्राह्मणःप्रभुरित्यादि॥

अतएवतद्धरणमपिराज्ञाकर्त्तव्यमित्याह॥

ब्राह्मणान्भरराजेंद्रपुनश्चब्राह्मणान्भर॥तस्मात्सर्वप्रयत्नेनपुनश्चब्राह्मणान्भरेति॰

दीप्सयोक्तं॥अन्यथाद्वेषेअनिष्टफलमपिदर्शितं। यथा॥

गतश्रीर्गणकंद्वेष्टिगतायुश्चिकित्सकं॥गतश्रीश्चगतायुश्चब्राह्मणान्द्वेष्टिभारतेति॥

एवंस्थितेऽप्यसोधत्यैनोपसंहरत्यश्वघोषः॥

अस्माभिरुक्तंयदिदंद्विजानांमोहंनि
हंतुहतबुधिकानां॥ गृण्हंतुसंतोय
दियुक्तमेतन्मुंचंत्वथाऽयुक्तमिदंय
दिस्यादिति॥

अत्राश्वघोषाभिप्रायस्तूत्तानएवपरंतुब्राह्मणाक्षेप
मसहमानासरस्वतीवास्तवार्थमेवंवदति। हतबुधि
कानांप्राप्तबुधीनामपीतिकर्मणिषष्ठीमोहंनिहंतु
प्रापयितुमितिणिचःअध्याहारःअस्माभिरुक्तमि
ति॥ हनहिंसागत्योः।अथवाप्राप्तबुधीनांनिर्धारणेयो
स्माकंमोहोजातःतंनिहंतुदूरीकर्त्तुमुक्तमिति। अयंभा
वः। एतदाक्षेपोक्तेः केनाप्युत्तरंदीयतेचेत्तदृष्टाऽस्म
न्मोहशांतिर्भवेदिति॥ एवंसदसदर्थद्वयप्रतिपादक
श्लोककथनात्अश्वघोषब्राह्मनिर्वचनेपरिसंख्यावि
धिःस्वीकरणोचितइत्यलंपल्लवितेन॥ एवंभूयात्॥
सकलकुशलसिध्यैसर्वदेवस्थलेषुव्रजतुभुविसमृ
द्धिंवत्सराणुत्सवश्रीः॥ अपगतभवरोगैरध्वराणां
प्रयोगैरखिलशुभकराणामस्तुभद्रंद्विजानामिति॥न
नुवज्रघोषेणस्ववज्रसूचीग्रंथांत्तेलिखितं॥यथा॥

यदानकुरुतेपापंसर्वभूतेषुदारुणं॥

कायेनमनसावाचाब्रह्मसंपद्यतेतदेति॥

एवंभूतमात्रैस्त्रिविधकरणैः पापाकरणेब्रह्मप्राप्तिरिति ज्ञात्वालिखिताऽपिब्राह्मणेषुवाचाग्रंथेन। मनसाध्यायतिहियत्तद्वाचावदतिध्रुवमितिवेदार्थोक्तेः मनसाचनिंदारूपपापमाचरितवान् संभावितस्यचाकीर्त्तिर्मरणादतिरिच्यतइत्येतद्दारुणपापमेवैतदाश्चर्यमितिचेन्न। यथाभागवते ४ स्कंधे ४ अध्याये॥

नाश्चर्यमेतद्यदसत्सुसर्वदामहद्विनिंदाकुणपात्मवादिषु॥ सेर्ष्यंमहापूरुषपादपांसुभिर्निरस्ततेजस्सुतदेवशोभनमिति॥१३॥

निंदाकरणकारणंचैवं॥भागवते ४ स्कंधे ३ अध्याये॥

पापच्यमानेनतदातुरेंद्रियःसमृद्धिभिःपूरुषबुद्धिसाक्षिणां॥ अकल्पएषामधिरोढुमंजसापंदंपरंहेष्टियथाःसुराहरिमिति॥१२॥

अहोभवंतोप्यतिप्राज्ञमश्वघोषमाक्षिप्तवंतः अतएतत्सर्वंभवत्सुकिंनस्यादितिचेत्।उच्यते। शठेप्रतिशठंकुर्यादादरेपुनरादरमितिन्यायात्यथातस्यात्तेपोक्तिस्तथाप्रत्युक्तिरपिलिखितेति॥तथाऽपिशाठेप्रतिशठं

कुर्यादित्यर्थशास्त्रं सामान्यजनविषयकं सच्चेष्टितं तेवं॥ गर्वनोद्दहतेननिंदतिपरान्नोभाषतेनिष्ठुरंउक्तं केनचिद्प्रियेणसहतेक्रोधंचनालंबते॥ मुक्त्वाकाव्यमलक्षणंपररुतंसंतिष्ठतेमूकवत्दोषांश्छादयतेस्वयंनकुरुतेत्येतत्सतांचेष्टितमिति॥ सत्यंपरंतुसंतोपिस्वस्मैकोप्यपराध्यतिचेत्सहंतेनतुलोकापराधं। यथाहभगवान्माघे॥

नदूयेसात्वतीसूक्तुर्यन्मत्यमपराध्यति॥ यत्तुदंदह्यतेलोकमदोदुःखाकरोतिमामिति॥

एवंसामान्यलोकापराधविषयेब्राह्मणविषयेतुभगवान्॥ घ्नंतंशपंतंपरुषंवदंतंयोब्राह्मणंनप्रणमेद्यथाऽहं॥ सपापकृद्ब्रह्मदवाग्निदग्धोदंड्यश्चवध्यश्चनचास्मदीयइति॥ एवंसापराधब्राह्मणसांत्वनएवशासनमुक्तं। अथघोषस्तुनिरपराधिब्रह्मकुलमेवद्वेष्टिअसौकथंनदंड्यःअपितुदंड्यएव। तत्रापिविप्रपीडाकरंछेद्यमंगमब्राह्मणस्यस्यादितियाज्ञवल्क्यस्मरणात्। अनेनवचसापीडाकृताऽतोस्यजिह्वाछेद्येत्यागतंतथाऽपिक्षमयाकेवलमाक्षेपमात्रंकृतमतोस्मासुनदोषावकाशइति॥ यथा॥

बालश्रुतीनामसदाग्रहाणामपक्वया
क्वामतिमानिनांच॥ मात्सर्यमुत्सार्यय
तुंमयोक्तंगृण्हंतुचेद्युक्तमिदंतुसंतः॥
सद्व्यवहारमवृत्यर्थमेवेदं सर्वलेखनंपरंत्वक्तश्चिंत
नीयमेवं॥ सर्वेऽपिसुखिनःसंतुसंतु सर्वेनिरामयाः॥
सर्वेभद्राणिपश्यंतुमाकश्चिद्दुःखमाप्नुयादिति॥ अतः
सर्वसौख्यार्थंभगवदाशिषमाशास्महे॥ सुभद्राशीःभद्रो
रम्याशालांशुकविराजितो॥ जितकाशीद्विरदरीबाण
दोश्छिन्नकद्रिपू॥ पूर्णानंदैकचिद्रूपोवरावर्तिजगत्रयो॥
दद्यातांशर्मवोनश्चतिरोहितपृथग्भ्रमो॥ देशोमालव
नामकेऽत्रनगरीभूपालनार्म्मीशुभातस्याअंतिशिहूर
नामकपुरीयस्यामजंत्राग्रणीः विल्किन्सन्निति साहि
बोविजयतेतस्याश्रितानांसभामध्येऽभूल्लघुटंकएष
विदुषांतोषायदोषापहः॥ नंदबाणगिरिचंद्रसंमितेशा
लिवाहनशाकेऽयनेऽवरे॥ अश्वयुग्धवळपंचमीबुधे
टंकएषखलुनिर्मितोलघुः॥ इतिश्रीहरिहरद्वयसुश्लो
कवरणादिघटितसुवर्णादिनाम्नासमस्तब्राह्मणवि
द्वन्मंडलीशिष्येणविरचितोवज्रसूचीलघुटंकः समा
प्तः॥ श्रीरस्तु॥ शुभंभवतु॥ ॥छ॥ ॥छ॥ ॥छ॥




3 2044 019 009 273

THE BORROWER WILL BE CHARGED AN OVERDUE FEE IF THIS BOOK IS NOT RETURNED TO THE LIBRARY ON OR BEFORE THE LAST DATE STAMPED BELOW. NON-RECEIPT OF OVERDUE NOTICES DOES NOT EXEMPT THE BORROWER FROM OVERDUE FEES.

Harvard College Widener Library
Cambridge, MA 02138 (617) 495-2413

